दिवः" माघः अर्श आद्यच् । २तद्वति त्रि० । "अह-र्दिवाभिरूतिभिः" । [दयोऽप्यत्र ।

**अहर्नाथ** पु० ६त० । १दिनपतौ २अर्कवृक्षे चाहरधिपा-

**अहर्निश** न० अहश्च निशा च समा०द्व० । अहोरात्रयोः "तयोः समुच्चयो मासः पितॄणां तदहर्निशम्" भा० ६स्क० । "तस्य सोऽहर्निशस्यान्ते प्रसुप्तः प्रतिबुध्यते" मनुः

**अहर्बान्धव** पु० अह्नि बान्धव इव प्रकाशकत्वात् । १सूर्य्ये । २अर्कवृक्षे च ।

**अहर्भाज्** स्त्री इष्टकाभेदे । "रात्रिसहस्रेण रात्रिसहस्रेणैकैकां परिश्रितं सम्पन्नामुपासीताहःसहस्रेणाहःसहस्रेणैकै-कामहर्भाजम्" । शत०ब्रा० । [वृक्षे च ।

**अहर्मणि** पु० अह्नि मणिरिव प्रकाशकत्वात् । १सूर्य्ये २अर्क-

**अहर्लोक** पु० इष्टकाभेदे । "ततोयाः षष्टिश्च त्रीणि च शतान्यहर्लोकास्ता अह्नामेव साम्निः क्रियते" शत०ब्रा०।

**अहर्विद्** पु० अहः एकाहसाध्यम् अग्निष्टोमं वेत्ति विद-क्विप् । एकाहसाध्याग्निष्टोमवेत्तरि "सुतसोमा अहर्विदः" ऋ० १,२,२ ।

**अहल्य** त्रि० न हलेन कृष्यम् । १हलाकृष्ये क्षेत्रे । २देशभेदे पु० । ३गोतमर्षिपत्न्यां स्त्री । अहल्योत्पत्तिर्यथा । "मौद्गल्यस्य सुतो ज्येष्ठोब्रह्मर्षिः सुमहायशाः । इन्द्रसेना यतोगर्भं वध्रस्यं प्रत्यपद्यत । वध्रस्यान्मिथुनं जज्ञे मेनकायामिति श्रुतिः । दिवोदासश्च राजर्षिरहल्या च यशस्विनी । शरद्वतस्य दायादमहल्या समसूयत । शतानन्दमृषिश्रेष्ठम् तस्यापि सुमहायशाः" हरि०३२अ० शरद्वतः इति गोतमस्य नामान्तरम् । यद्वंशजातः कृपाचार्य्यः शारद्वत इति गौतम इति चाख्यायते । तस्यागोतमशापकथा अफलशब्दे २६८ पृष्ठे दृश्या । तस्याः शापविमोचनमुक्तम् । "तस्मात् प्रविश्य रामाशु गौतमस्याश्रमं विभो ! । तारयेमां महाभागामहल्यां शापविह्वलाम् । विश्वामित्रवचः श्रुत्वा रामः सौमित्रिणा सह । विश्वामित्रं पुरस्कृत्य प्रविवेशाश्रमं ततः । स ददर्श महाभागां तपसा द्योतितप्रभाम् । सेन्द्रैरपि सुरैः साक्षादनालक्ष्यां समागतैः । प्रयत्नान्निर्म्मितां धात्रा दिव्यां मायामयीमिव । धूमेनापि परिताङ्गीं दीप्तामग्निशिखामिव । तुषारेणावृतां साभ्रां पूर्णचन्द्रप्रभामिव । मध्येऽम्भसो दुराधर्षां दीप्तां सूर्य्यप्रभामिव । सा हि गोतमवाक्येन दुर्निरीक्ष्या बभूव ह । त्रयाणामपि लोकानां यावद्रामस्य दर्शनम् । दृष्ट्वैव राघवौ तस्याः पादौ जगृहतुस्तदा । सा च तौ पूजयामास स्मृत्वा गौतमभाषितम् । पाद्यार्घासनसत्कारैर्यथावत् प्रीतमानसा । प्रतिजग्राह रामश्च पूजां तां विधिवत् तदा । सस्वनुर्देववाद्यानि पुष्पवृष्टिः पपात खात् । गन्धर्वाप्सरसां चैव महानासीत् समागमः । साधु साध्विति देवाश्च तदाहल्यामपूजयन् । विशुद्धां तपसोग्रेण तदा रामसमागमे । गोतमोऽथ महातेजा दृष्ट्वा दिव्येन चक्षुषा । स्वमाश्रमपदं राममागतं प्रत्यपूजयत् । समेत्य भार्य्यया चैव पूतयाऽहल्यया तदा । तत्रैव सहितोभूयस्तपस्तेपे महायशाः" इति रामा०आ० । "अहल्या द्रौपदी कुन्ती तारा मन्दोदरी तथा । पञ्च कन्याः स्मरेन्नित्यं महापातकनाशनम्" प्रातःस्मरणीये पुरा० ।

**अहल्याजार** पु० ६त० । इन्द्रे तत्कथा अफलशब्दे २६८पृष्ठे ।

**अहल्यानन्दन** पु० ६त० । शतानन्दे ऋषौ । तस्योत्पत्तिकथा अहल्याशब्दे उक्ता अहल्यासुतादयोऽप्यत्र ।

**अहल्याह्रद** पु० ६त० । गोतमाश्रमस्थे स्वनामख्याते तीर्थभेदे "ततोगच्छेत ब्रह्मर्षेर्गौतमस्य वनं प्रियम् । अहल्याया ह्रदे स्नात्वा व्रजेत परमां गतिम्" भा०वन ८४अ० ।

**अहल्लिक** पु० अहनि लीयते ली-ड नि० संज्ञायां कन् । प्रेते । प्रेताहि रात्रौ चरन्तो दिवा लीयन्ते इति प्रसिद्धम् । "अहल्लिकेतिहोवाच याज्ञवल्क्यः" वृ०उ० । "अहल्लिकेति होवाच याज्ञवल्क्यो नामान्तरेण संबोधनं कृतवान्" भा० । "नामान्तरेण अहनि लीयते इति प्रेतवाचिनेति' शेषः आनन्दगिरिः ।

**अहस्कर** पु० अहःकरवत् । १सूर्य्ये, "अलञ्चकारास्य वधूरहस्करः" माघः । २अर्कवृक्षे च ।

**अहस्त** त्रि० न स्तः हस्तौ यस्य । हस्तशून्ये प्राणिनि १छागादौ "अहस्ताश्च सहस्तानां शूराणां चैव भीरवः" मनुः २छिन्नहस्ते च । "अपादहस्तो अपृतन्यदिन्द्रम्" ऋ० १,३२,७ ।

**अहस्पति** पु० अहःपतिवत् । १सूर्य्ये २अर्कवृक्षे च ।

**अहह** अव्य०अहं जहाति अहम्+हा-क पृषो० ॥ १सम्बोधने २आश्चर्य्ये, ३खेदे, ४क्लेशे, ५प्रकर्षे च । "अहहारे त्वा शूद्र" छा०उ० "अहह महतां निःसीमानश्चरित्रविभूतयः" वीरच० "अहह कष्टमपण्डितता विधेः" गणर० ।

**अहहा** अव्य० अहं जहाति हा-डा । "अहहशब्दार्थे" "भिक्षित्वाऽपि बुभुक्षितं यदहहा" गणरत्न० ।

**अहार्य्य** पु० हृ-ण्यत् न०त० । १पर्व्वते । २हर्त्तुमशक्ये ३अभेद्ये च त्रि० । "तत्रात्मभूतैः कालज्ञैरहार्य्यैः परि-